ति। कीदृशास्ते। उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः। सर्वंमिधुकरोत्पामधुरुतं तन्मधु वसंते सर्वैः पीतं तस्मादुन्मत्तमधुगंधेन स्वयमपि लुब्धाः संतस्तत्पानात् मधुपा जातास्तैः। उन्मत्तमधुगंधेन लुब्धमधुपैः॥ व्याधूतकंपितचूतांकुरेषु क्रीडितां कोकिलानां काकलीकलकलैः॥ सूक्ष्माव्यक्तमधुरैः शब्दैः उद्गीर्ण उद्गमित उत्थापितः कर्णज्वरो येषु ते तथा। ज्वरः दुःसहस्तथा। तेषामेवंविधाः शब्दाः प्रियं विना दुःसहाः भवंतीत्यर्थः॥ तर्हि कैः कृत्वा ते नीयंत इति चेत्तत्राह॥ ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैः॥ एवंविधशब्दश्रवणाद्विरहे प्रियाप्राप्तौ दशमीव्यवस्थापर्यंतप्राप्तदशायां प्रियस्य ध्यानावधारणक्षणे प्राप्तप्राणसमप्राणांतुल्यास्त्रा समंतात् समागमरसोल्लासैः उत्साहैः कृत्वा अमी वासरा नीयंते निर्वाह्ये एवंविधं सरसं सखीवाक्यं श्रुत्वा प्रियमिलनाभिलाषयुक्तां राधां दृष्ट्वा विरहे दशावस्थांतःपातित्वाद।

भिलाषवतीं ज्ञात्वा यत्कृतं तदेवाह॥ ॥अनेकनारीपरिरंभसंभ्रमेति॥ ॥अनेकनारीपरिरंभसं
भ्रमस्फुरन्मनोहारिविलासलालसं॥ मुरारिमारादुपदर्शयंत्यसौ सखीसमक्षं पुनराह राधिकां
॥४॥ या पूर्वं कंदर्पज्वरजनितचिंताकुलां दृष्ट्वा न्नूसरसमूचे असौ सखि राधिकां प्रति पुनः प्राह
। किं कुर्वंती मुरारिमारादुपदर्शयंती मुरारिं श्रीकृष्णं आरात् प्रत्यक्षं उपसमीपे दर्शनीकारयंती
मुरदैत्यस्यारिस्तं। षोडशसहस्रराजकन्यापरिग्रहहेतुस्तत्प्रतिबधकं मुरं हत्वा तासां परिग्रहः कृ
तस्तदा तद्दृष्ट्वा सत्यभामयेर्ष्या न कृता तथा त्वयैताभिः सह विहरंतं प्रियं विलोक्येर्ष्या न कर्त्त
व्या।त्याशयेन मुरपदोपदन्यासः कृत इति भावः सूचितः। ननु कथमनभीष्टमनभीष्टं नायका
भिः सह प्रियकृतरमणं दर्शयंतीत्यत्राह॥ कथंभूतं मुरारिं॥ अनेकनारीपरिरंभसंभ्रमेस्फु
रन्मनोहारिविलासलालसं॥ अनेकानामसंख्यानां नानाभावयुक्तानां नारीणां परिरंभसं
भ्रमेणालिंगनातिशयोत्साहेन कृत्वा स्फुरन्मनोहारि स्फुरती। स्फुरत् स्फुरन्मनोहा।

तिश्रीराधाविलासे ।कुतूहलात्सौत्कंठ्यं यस्य तं।तासामालिंगनेन संभ्रमेणच्छला श्रीराधाप
रिरंभणे ताभ्यो म्य स्फुरंत्या तद्विलासलालसं प्रियं।आरान्निकटे गत्वा समदं आद्दिगोचरं य
थास्यात्तथा सखीजनशीलव्यसनात्तस्याः क्लेशं विरहजनितमसहमानादर्शयतीद
र्शनं कांक्षतीति सूचितं।एवंभूतापि चेयं गीते तृतीयावस्थया [illegible] कंदर्पज्वरसंतप्तां विलो
क्य सख्या दर्शयितुं।विहरंतं प्रियं लीलानारीभिः [illegible] केशवं मनोहारिविलासेषु तात्रेम्यज्ञा
नकामुकं॥ ॥इतिश्रीगीतगोविंदे तृतीयगीतं वसंतवर्णनं॥ ॥अथ चतुर्थगीतमाह॥ च
तुर्थंतु सखीगीते दर्शयामास राधिका॥विलासंबंधुमुक्तानि माधवस्योच्यते कृतं॥१॥ तदेवा
ह॥ ॥चंदनचर्चितनीलादिना॥ ॥गीतस्यास्य रमकरीरागः॥ ॥चंदनचर्चितनीलकलेव
रपीतवसनवनमाली।केलिचलन्मणिकुंडलमंडितगंडयुगस्मितशाली॥१॥हरिरिह मु
ग्धवधूनिकरे विलासिनि विलसति केलिपरे॥ ॥तत्र [illegible] प्रेमनम्नास्वरूपणां गी

गीत०भाव०

प२

नीलं निचोलवपुषा वहंती॥ कांते पदोपांतमधिश्रितेपि मानोन्नता रामकरीयमिष्टे॥ यतित्वाल
श्राद्धे विलासिनि॥ असमानोर्द्धविलासनीले॥ यथास्फुरन्मनोहारि॥ विलासचालनसो मुरारिस्त
थात्वमपि॥ हरिस्तासां कलवहरणार्थं इह वृंदावने वसंते वा मुग्धवधूनिकरे हरे रन्तिप्रायानस्मि
ष्टे॥ यद्वा॥ संप्रार्थित रमणो विलसति॥ त्वद्विलाससादृश्यान्नाशंकामयते॥ कीदृशे केलिपरे॥ केलिषु
परे उत्कृष्टे संप्रार्थितरमणो विलसति॥ त्वद्विलाससमादृश्यान्नाशंकामयते॥ कीदृशे केलिपरे॥ केलि
षु परे उत्कृष्टे यद्वा॥ केलिषु परे तत्परे॥ मुग्धवधूनिकरे॥ मुग्धानां चातुर्यादिरहितानां गोपालानां
वधूः मुग्धवधूस्तासां निकरे स्वयं केलिपरः स्वच्छंदेन मौग्धत्वात्केलिषु मुख्यत्वात्तद्याया नावाध
ध्रुलाघ्रस्वातंत्र्यान्नावाप्ताधीसितव्यवहारं कर्तुमशक्यत्वाच्च सर्वदा व्रजातिष्ठति॥ इह वसंते
विगलितलज्जानां वधूनां निकरे विलासेन कापि शंका॥ यद्वा॥ चातुर्यादिरहितत्ते मुग्धव
धूनिकरे विलसति॥ यद्वा॥ मुग्धो हरिः॥ क्रीडतीति॥ वक्ष्यमाणत्वात्स्वयं मुग्धः॥ तां सर्वेनावव

प्रबोधिनी०

प२

ती सर्वगुणोपेतां परमचतुरां त्यक्त्वा वधूनिकरे विलसति। कीदृशो हरिः चंदनचर्चितः कं
दर्पज्वरसंतप्तां त्वां मनोहारिणीं स्फूर्त्या संतापयुक्तः सन् चंदनेन चर्चितः॥ यद्वा। त्वद्दत्तचंद
नेन तथा। पुनः नीलकलेवरः पीतवसनः। नीलकलेवरे पीतं वसनं यस्य सः। तद्वर्णस्या
सा त्वं पीतवसनेन धरति। पुनः वनमाली। वनमाला विद्यते यस्य सः। त्वत्समर्पितां वनमा
लां जयप्रकाशिकां कीर्त्तिमर्यादधानः। कल्पितललितवनमालेत्युक्तेः। तेन मुग्धवधूनां नि
करे रतिरणे तथा भवदिति भावः॥ पुनः केलिचलन्मणिकुंडलमंडितगंडयुगस्मितशा
ली। केलिषु चलन्मणिकुंडलाभ्यां मंडितेन गंडयुगेन स्मितेन च शाली शोभनः। तासु
केलिषु तासां मुखमवलोक्यमानः सन् शिरोधूननेन तयोश्लाघनं। मुग्धवधूनां निकरे विल
सनात् स्मितयुक्तश्च। ननु एवं ज्ञात्वा तासु कथं विलसति हरिरिति। तासां त्वत्तवराणां दु
:खहरणात्तथा। ततो हेतुमाह॥ ॥पीनपयोधरेति॥ ॥पीनपयोधरभारभरेण हरिं

Geeta Govinda vallabhacharya-agrahara.org Bhava Prabodhini

परिरभ्य सरागं ॥ गोपवधूरनुगायति काचिदुदंचितपंचमरागं ॥३॥ काचित्गोपवधूः पीनपयो
धरभारातिशयेन सरागं यथा स्यात्तथा हरिं परिरभ्य उदंचितपंचमरागं गायति । तासां मध्ये का
च्चिद्गोपवधूर्गवां पशूनां पालनकस्य तथाविधस्य दिवसे तच्चारणपरस्य निशि श्रमातिशयेन श
यनपरस्य गोपस्य वधूः सा निविडातिकठिनस्तनभारातिशयेन स्नेहपूर्वउः स्वहस्तौ रहः हरिं । य
था सरागं । त्वदनुरागेण सह वर्त्तमानं तं परिरभ्य सवेग स्वहरणादानंदिता सति अनु पश्चा
दुदंचितः उदधिकं अंचितः गतिं प्रापितः पंचमस्वरो यस्मिन्नेवंविधं रागं । यद्वा । पंचमरागं गा
यति । नन्वन्यद्रागं त्यक्त्वा पंचमरागगाने को हेतुः । सरागमिति ॥ रागेण सह वर्त्तमानं । रागेनु·
रागो गोपीनां सः कोनाडवीति गोप्यकामानयालं कसङ्कुकलाकामः पंचशरस्तज्जनितानुरा
गस्तेन सह वर्त्तमानं यथा स्यात्तथा पंचमरागं गायतीति भावः । एवंविधायाः केलिपरत्वमुक्त
मित्याशयः । तासां मध्ये काश्चिन्मुग्धाः काश्चिन्मध्याः काश्चित्प्रगल्भाः नानाविधाः संति तन्म·

घ्येमुग्धयायाः विलासमाह॥ ॥कापिविलासविलोलेति॥ ॥कापि विलासविलोलविलोचनखे
लनजनितमनोजं ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजं॥२॥ कापि मुग्धवधूः मुग्धा
वधूर्मुग्धवधूः। यद्वा मुग्धस्य पूर्वोक्तिस्य वधूः मधुसूदनवदनसरोजं अधिकं ध्यायति। मधुसू।
द्रुपकारेणात्र अधिकं अनन्यान्वेषणपरो मधुसूदनः। तस्मान्मधुसूदनपदेन भ्रमरस्तद्वद्
द्विशेषान्वेषणपर इति हेतोर्मधुसूदनपदप्रयोगः कृतः। तद्यथा। हे मल्लि हे मालति हे लवं
गि नित्यादृशी कापि नवा दृशीनां तु एवं समाधाय मधुव्रतं यामि विस्मारयत्यंबुजनीवियोग
मिति। एतेन तद्रसान्वेषणपरो विलसतीति ज्ञापितं। एवंविधं मधुसूदनवदनसरोजं ध्यायति
ननु समक्षे साक्षात्स्वरूपदर्शने विलासे ध्यानं कथं संभवति। ध्यानं परोक्षे हि विप्रयोगे भवती॥
तिचेत्तत्राह। मुग्धवधूरधिकं मधुसूदनवदनसरोजमिति॥ मुग्धातिचपलत्वान्मुग्धवधूः॥
अयं तु मधुसूदनः भ्रमरतद्रसान्वेषणपरो विलसतीति ज्ञातो वदनसरोजे ज्ञातस्तस्मात्तद्वदन

Geeta Govinda vallabhacharya-agrahara.org Bhav Prabodhini

सरोजमधिकंयथास्यात्तथाध्यायतिचिंतयति।ध्यैचिंतने।अलसवलितेरित्यादिमौग्ध्यमा
वैश्चिंतयति।नलक्ष्मिमुद्रणंकृत्वाध्यानंसंबोभवितुमर्हति।यत्नोजमगदीक्षतांपदकदंवश्रां
त्रुटिर्युगायतेत्वामपश्यतामित्युक्तत्वात्तथेतिभावःसूचितः।किंच।कीदृशंवदनसरोजं।वि
लासविलोलविलोचनखेलनजनितमनोजमिति।विलासोत्रक्रीडनं।क्रीडातुनानाप्रका
रिकारसावहाभवति।हरिस्तुसर्वरसभोक्ता।एकेनस्वरूपेणसर्वाभिःसहएकविधिक्री
डायांनानारसत्वंनस्यादतःकापिप्रगल्भापीनपयोधरभारभरेणहरिंपरिसरागंगायति।
कापिमुग्धाविलासेनविलोलयोश्चलयोर्विलोचनयोःविशिष्टलोचनालोचनपरयोःखे
लनेनजनितउत्पादितोसौमनोजोयेनतत्।एवंविधंध्यायति।अग्रेवक्ष्यमाणंकापिकपो
लतलेमिलितादयितंचुचुंब।कापिमंजुलवंजुलकुंजगतंकरेणदुकूलेविचकर्ष।कापि
रासरसेहरिणासहनृत्यमानायुवतीप्रशसंसे।श्लिष्यतीकामपीत्यादिनानानाविधैर्भावै

र्विलासेनानाविधरसम्भोगे कापि ध्यायति इत्युक्तमित्यर्थः॥ यद्वा॥ त्वद्विलाससादृश्यपविशेष
मनलभ्यमानत्वाद्विशेषेण लोलविलोचनयोः खेलनेन तासां मनोजोत्पत्तिर्न तु साहजिकः॥
अतो मुग्धवधूनिकराः॥ यद्वा॥ तेन त्वद्विलासविलोचनाद्विलोचनं त्वं विनाकृणा मनसि मनो
जो नानात्वं तु स्वभावतः कामादिपदं त्यक्त्वा मनोजपदेनेति भावः सूचितः॥ किंच॥ नयनादिने
त्रदृष्ट्यादिपदं विहाय विलोचनपदप्रयोगस्यापि हेतुरुक्तः॥ एवं एकैकस्यामेकैकेनाव
प्राप्तत्वेन विलासकरणमाह॥ कापि कपोलतले इति॥ ॥कापि कपोलतले मिलिता ल।
पितुं किमपि श्रुतिमूले। चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले॥ ४॥ कापि नितं।
बिनी नितंबो विद्यते यस्याः सा नितंबो मध्यमा गत्वा कापि मध्या सा नितंबवती लीलया वि
लासाद्वापि सा श्रुतिमूले श्रवणनिकटे मिलिता सती किमपि लपितुं कथनव्याजेन चारु
कपोतले दयितं प्रियं चुचुंब॥ कीदृशे पुलकैरनुकूले॥ नवस्पर्शेन तवस्पर्शस्मरणात्।

गीत० भार०
५६

सात्विकात्वर्नवात्पुलकैः श्रवणानुकूले उत्सके। यद्वा। पुलकैः कलाप्रियाभिलापस्तव
के। कपोलतले चुंचुंब। अन्याकृत्यमाह॥ ॥केलिकलाकुतुकेनेति॥ ॥केलिकलाकुतुके
न च काचिदमुं यमुनाजलकूले। मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले॥५॥ का
चित्प्रियतमा केलिकलाकुतुकेनामुं हरिं यमुनाजलकूले॥ मंजुलवंजुलकुंजगतं करे
ण दुकूले विचकर्ष। त्वया अनुभूतकेलीनां कलाषोडशीनागस्तस्मिन् कुतुकेनोत्कंठितेन
मनसा त्वामन्वेषणपरे यमुनाकूले विरहतप्ता वंजुलवेतसीकुंजे गतान्भविष्यतीतिज्ञा
त्वा त्वत्स्पर्शाशया मनोहरे तत्कुंजे गतं अमुं परिहस्यमानं हरिं करेण पीतांबरखंडग्रहे
विचकर्ष। एकोत्तरीयपीतांबरधरणे कदाचित्संतप्तः क्वा गच्छेत्तस्माद्दुकूले उत्तरीयं परिध
तं च करेणैकेन धृत्वा द्वितीयकरेण कुंजद्वारस्थशाखां गृहीत्वा यथा कुंजेन गच्छेत्तथा क
र्षयामासेति भावः। अपराकृत्यमाह॥ ॥करतलतालेति॥ ॥करतलतालतरलवलया

प्रबोधिनी०
५६

वलिकलितकलस्वनवंशे॥ रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे॥६॥ काचि
द्युवती रासरसे सहनृत्यपरा हरिणा प्रशशंसे। काचिद्युवती। यूमिश्रणे मिश्रीभूता स·
ती रासरसे सहनृत्यपरा॥ अर्थाद्धरिणा सहनृत्य एव परो गुणो यस्याः सा हरिणा स्तुता। किं
चित्तदीयनृत्यसादृश्यपात्रा समालोक्य सम्यक्सम्यगिति प्रशंसिता। कीदृशे रासरसे। क
रतलतालतरलवलयावलिकलितकलस्वनवंशे। करतलतालैस्तरलवलयावली
भिः कलितो मिलितो कलोऽव्यक्तमधुरः स्वनो वंशो यस्मिंस्तस्मिन्। या नृत्यति सा क
रतले तालवाद्यं करोति तेन तरलाश्चपला वलयानामावलीभिः श्रेणीभिः सह मिलित
ः॥ अव्यक्तः॥ तालवलया॥ वलिरवाद्ययोर्वशावाह्स्याव्यक्तात्मावान्मनोहर इति भावः। न
स्याः नृत्यमेव परो गुणः। न तु लब्धत्समसर्वगुणयुक्तेति ज्ञापितं। रासरसे नृत्यपरा र
सानां समूहो यस्मिंस्तस्मिन्नेव रसे। नृत्यपरा। पूर्वोक्तमुग्धवधूत्वात्स्वस्थकस्वातंत्र्या

Geeta Govinda
Bala Prabodhini

दृकाकीदृ,कनानाभावाहसंतेवध्वनिकरेसमूहेप्रोक्तलाजासरसेनत्यपरोक्तमितिभावः॥
अतःपरमपरासुतदीयभावः॥कोपिविशेषंतेनैवेतिजिज्ञासायामपरासुसर्वासुविलास
माह॥ ॥श्लिष्यतिकामपीति॥ ॥श्लिष्यतिकामपिचुंबतिकामपिकामपिरमयतिरामं॥
पश्यतिसस्मितचारुतरामपरामनुगच्छतिवामां॥७॥एवंविधस्सनयांकामपिश्लिष्यत्या
लिंगति।कामपिचुंबति।कामपिरामांरमणपरांरमयति।इत्यादिभिर्नवैःपृथक्पृथगनु
भूयत्वात्सादृश्याभावमालोक्यइतस्ततःपश्यितसन्नपश्यति।तदाचारुतरामपरामरं
वामांसर्वापेक्षयातिशयेनचारुत्वात्तरांतांकिंचित्तत्सादृश्याभासमालोक्यतामनुगच्छ
ति।अनुनयपूर्वकंप्रसाद्यतांगच्छति॥यद्वा।वामांवाविकल्पेनमांत्यद्धमीदृढजैत्रमीयो।
कोलांक्षालानुपश्याआगच्छतीतिभावः॥यद्वा।कीदृशींतांसस्मितचारुतरां।स्मितेनसहस
स्मितस्तेनतेनचारुतरां।सर्वासांहृतत्वंदृष्ट्वा।कापिपीनपयोधरभारभरेणहरिंपरिरभ्य

गायति॥ कापि कपोलतले मिलिता लपितुं व्याजेन चुंबति। कापि मंजुलवंजुलकुंजगतं करे-
ण दुकूले विचकर्षति। कापि रासरसे हरिणा सह नृत्यति। कामपि श्लिष्यति। कामपि चुंबति
कामपि रमयति। एवंविधं विलोक्य सस्मिता जाता यतः स्वयं चासक्ततरा वामा स्त्रीस्वभावप-
रा किंचिन्मानवती स्वतो न गच्छति। अतः हरिरेवंविधां दृष्ट्वानुगच्छति। एतद्दर्शनं कारयि-
त्वा किं ज्ञापितं। यथैतस्यां क्रीडाविशेषं दृष्ट्वा परस्परं सर्ष्या न जाता तथा त्वयापि दृष्टेर्ष्या
न कार्येति ज्ञापितं कथं न कार्येति ज्ञापितं। कथं न कार्यत्याशयेनाह॥ ॥श्रीजयदेव
भणितमिदमद्भुतेति॥ ॥श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यं। वृंदावनविपि-
ने ललितं वितनोतु शुभानि यशस्यं॥ ८॥ इदं परिहृष्टरूपमाणं अद्भुतकेशवकेलिरहस्यं। ए-
जसालिकाक्षामसादिभाववतां गोपवधूनां विभ्रमतादधिकसुखोत्पादकं स्वकेलिक्रीडार-
हस्यं श्रीराधाविलासपरीरंभास्वरूपं विपिनविलासकलावलितं। विपिने वृंदावने विलासक-

लानिर्वलितिद्युक्तं। यद्वा। विपिने राधायामनुभूतविलासस्य कलाषोडशांतद्वलितमित्यर्थ
:। एवंविधं श्रीराधापरीक्षणरूपत्वादद्भुतं केशवकेलिरहस्यं शुभानि बद्धं वचनात् श्रीरा
धायाः केशाद्दर्शनात्सर्वासां सखीनां भगवतश्चापि मनोहारिविलासकुलसस्य केशज
ननात्सर्वविधशुभान्येव। तस्याः केशानायेन सर्वाणि शुभान्येवं वितनोतु॥ विस्तारयत्वाशि
:कीदृशं। श्रीजयदेवेन भणितं। श्रीमांश्चासौ जयदेवश्च। एतच्चरित्रभणनात् श्रीमान् जातः।
भणितपदेन यथा। भक्तकंठ भणति तत्पदमपि सर्वसिद्धं भणितमित्यर्थ॥ पुनः कीदृशं य
शःस्यं। कुतो। अद्भुतत्वात्। किमद्भुतं। प्रवयस्य[illegible]णविरहे कंदर्पज्वरजनितदशामवस्थापर्यं
तमाधियुक्ता जाता तस्याश्च वयस्यात्मरमणश्रवणरमणदर्शनाभ्याधिकव्यथासात्केशव
केलिरस्यानिःसहकरणश्रवणदर्शनाभ्यासंगेन व्यथादृष्टस्याकरणादद्भुतत्वं दशमीदशानि
वर्तकत्वाद्यशस्यं च। प्रियविरहे दशमीदशाभवनात् प्रियसापयशोजनवेतत्वानिवर्तकि

त्वाद्यत्रास्यमितिभावः॥ किंच अतएवपूर्वमुक्तं सरसं। रसेनसहवर्त्तमानमौषधप्रयोगवत्। औषधंतुसाद्राक्षादिकमुदरगतंव्याधिंनाशकंस्यादिदंतुश्रवणदर्शनाद्याधिनिवर्त्तकत्वादद्भुतंततोप्यत्रास्यमितिच। यथासद्वैद्यकृतऋषिप्रणितोपायः प्रमाणत्वेनमन्यंते तथेदंश्रीजयदेवभणितत्वात्तथेतिभावः। वृंदावनविपिनेचरितमिति। वृंदायाःवनमेवविपिनंतत्रचरितंगतियुक्तंजातं। एवंविधंश्रीजयदेवभणितमद्भुतकेशवकेलिरहस्यं। श्रोतृवक्त्रोः अन्यानिलौकिकान्यलौकिकानिवित्तनीवित्यर्थः॥ ॥इतिचतुर्थंगीतंसमाप्तं॥ ॥एवंविधंहरिक्रीडितंविश्वेषामनुरंजकंभवतितदाह॥ ॥विश्वेषामनुरंजनेनेति॥ ॥विश्वेषामनुरंजनेनजनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं॥ स्वच्छंदंव्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः शृंगारःसखिमूर्त्तिमानिवमधौमुग्धोहरिःक्रीडति॥१॥ हेसखिएवंविधोहरिःमधौवसंतेमुग्धःक्रीडति। किंकुर्वन् विश्वेषामनुरंज

Geeta Govinda vallabhacharya-agrahara.org Bhava Prabodhini

नेमानंदं जनयन्। सखीति संबोधने समानशीलव्यसनत्वाद्धि स्वेषामनुरंजनत्वाद्यथाहं केश
वकेलिरहस्यमद्भुतं दृष्ट्वानुरंजिताभवामि तथा त्वमपि विलोक्यानुरंजिता भवेत्याशयः। य
तो मधौ तरुणकारवं धौ। सर्वाः कालात्। कीदृशो हरिः मुग्धः मुग्धवधूनिकरैः क्रीडनात् स्व
यमपि मुग्धो जातोऽयकः। सर्वावयवसुखदां सुभगां च सर्वे भावयतीं गोविंदाय मुग्धवधूनि
करैः पृथक् पृथक् क्रीडनात्तथेति भावः। किं कुर्वन्। अंगैरंगोत्सवं जनयन् सर्वावयवैः
कामोत्सवं जनयन्नुत्पादयन् प्रकटयन्। कीदृशैरंगैः। इंदीवरश्रेणीश्यामलकोमलैः
इंदीवरपद्मानामापहरशीतलत्वं श्रेणीपदान्नवनवायमानत्वं श्यामलत्वाद्दर्शनीयत्वं
कोमलोक्यासुखस्पर्शकिमारत्वं च सूचितं यद्वा। एवंविधैरंगैरंगरहितस्यापोत्सवमुप
नयति किं वाच्यमंगसहितानां। कीदृशो हरिः। अत एव स्नेहातिशययुक्ताभिर्व्रजसुंदरी।
भिः स्वच्छंदं सर्वतः अंगमंगं प्रतिप्रत्यंगमालिंगितः॥ अत्रावसरे काचिद्व्रजसुंदरी एणमा

चतुरः।विश्वेषामनुरंजकश्च क्रीडति।पदोक्त्या वर्त्तमानप्रयोगेन क्रीडाया विरामाभावः।सूचि-
तः।ननु विश्वेषामानंदं जनयति तर्हि केपि दुःखिताः केपि सुखिनः कथं दृश्यंत इत्यत्राह।।अ-
नुरंजनेति।रंजनात्स्वपूर्वं विश्वं तत्कृतधर्माचरणात्संरंजनं करोति।तदनु पश्चात्तेभ्य आनंदं जनयति
।यद्वा।जितैव काचित्सा सृष्टिरिति वचनात्स्वनिर्मितविश्वेषामानंदं जनयति।नत्यानुतोषन्भगवा-
न्ये यथा मां प्रपद्यंते तांतथैव भजाम्यहमित्युक्तेश्च न्यायं करोति।ननु निरपेक्षः कथं तथा वैषम्यं
करोतीत्यत्राह।।कीदृशो हरिः।क इव।शृंगारो मूर्त्तिमानिव।शृंगाररसशास्त्रोक्तस्तथाह्लादिकोयं मूर्त्ति-
मान्स्वरूपवानिवोत्प्रेक्षते।स द्विविधः।संयोगविप्रयोगरूपश्च।संयोगः सुखात्मको विरहे दुः-
खरूपः।तथा हरिः सेवापरेषां संयोगिनां सुखदः।सेवाविमुखानां पृथक्स्थितानां दुःखात्म-
कः।तेषामपि सुखदो यथा विरहे तत्स्मरणे सर्वत्र तं पश्यति।विमुखानामपि दोषपालकंसा।
दिनामपि तथा।यद्वा।मूर्त्तिमान्शृंगारः क्रीडति।क्रीडा हि नानारूपा दिव्यवस्तु क्रीडानां मंनैक।

Geeta Govinda vallabhacharya-agrahara.org Bhav Prabodhini

षष्ठीतिपत्रे
प्रथमपृष्ठेद्वितीय
पंक्तौ शोधपत्रं·

विधायांरसोत्पत्तिःरसोपिनानाविधश्चातोरसानुरूपांक्रीडांकरोतिनात्रवैषम्यंननुपूर्वोक्तं
व्रजसुंदरीभिःप्रत्यंगमालिंगितस्तदाएकेनाप्यनेकासांसमाधानंकथंस्यात्तत्राह॥शृंगारोमू
र्त्तिमान्यथाशृंगाररसःएकोपितिस्मेषामानंदंजनयतितथायमपिमूर्त्तिमान्शृंगाररूपत्वात्ता
सामानंदयतीतिभावः।यद्वा।शृंगारःमूर्त्तिर्विद्यतेयस्यभगवतःसतथा।शृंगारशब्देनशृंगारर
सः।रसोवैसः।रसाश्चायमानंदयतीतिकृत्स्नरूपात्तशेषविभावःसूचितः।ननुएवंविधश्चेत्तदामा
मनुरक्तांकथंनानंदयतितत्राह॥शृंगारस्तुद्विविधःसंयोगविप्रयोगात्मकत्वात्पूर्वंसंयो
गानुभवंकारयित्वाविप्रयोगरसानुभवंकारयति।स्वयमपिविरहानुभवैकलानंदानुभवं
कारयित्वास्वयमपितत्कारिणाति।इत्येवव्यायस्यायमर्थश्लोकः।एवंकथयत्यपिसखीश्रीराधा
मत्यातुरांवद्धापसंस्कृतरसप्रयोगात्सर्वथाव्याधिरनिवर्त्तितोज्ञात्वायंदेवोपिदृतोव्याधिरौ
षधादिनाननिवर्त्ततेनिर्वेदित्वचिज्ञात्वातःपरंदेवादिरक्षाकर्त्तैवेतिनिश्चित्यततस्यांदेवस्याविष^
×प्रयोगेरुक्तवानित्याह॥रासोल्लासभरेणेति॥रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरभ्य
निर्भरसुरःप्रेमांधयाराधया।साधुत्वद्वदनंसुधामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारी
हरिःपातुवः॥२॥हरि[illegible]तुकाया॥पौ॥१

Geeta Govinda
Bhav Prabodhini
vallabhacharyakirtana.org | vallabhacharya-agrahara.org

लिंगनादेकस्यहरेः।अमानावाग्रमक्रीडायांव्ययानावश्यसूचितः।अतएवमूर्त्तिमानि
वमधौशृंगारः।शोभाजनकःमुग्धश्चअतिसूतोदरिः।स्मितमनोहारिः।स्मितंमनोहारि
यस्य।यस्यदेवस्योन्मादजनकस्मितेनमनोहरणंकृतं।हासोजनोन्मादकरःस्वमायावा
स्नेहातिशयेनतास्तुनगणिता॥किंभूतश्चुंबितः॥साधुत्वद्वदनंसुधामयमितिगीतस्तु
तिव्याजात्व्याहृत्याहेसाधुत्वद्वदनं।सुधामयिंइतीमांतास्तुतिव्याजात्।कोर्थः।स्तुति
मिषेणव्याहृत्यनिगद्यउत्कटंयथास्यात्तथाचुंबितः॥ननुप्रेमांधयातयाकृतंतेनभगवताता
सांसमीपेकथंतत्कारितमितिचेत्॥साध्वीति।यःस्वयंसाधुर्भवति।ससर्वंतथापश्यति
स्तुतिव्याजज्ञानाभावात्तथाकारितं।तथापिषड्गुणात्मकोभगवानैश्वर्यवीर्ययशःश्री
ज्ञानवैराग्ययुक्तोलोकवत्कथंज्ञानाभावस्तत्राह॥रासोल्लासभरेणेति।[illegible]समूहोरास
स्तस्योत्साहातिशयेनतज्जसावेशेनान्यस्फूर्त्तारसःपुष्टोऽस्यानसांगश्च।सांगरसतो

गरूरणात्तज्ञानाभावश्चोक्तः॥ ननुआभीरवामभ्रुवाभिःसापत्न्यलाहवाभिःसापत्न्यला
हृष्ट्वातासामीर्षाकथंनजातातत्राह॥ स्मितमनोहारीति। राधायाःस्तुतिव्याजवैदग्ध्या
वलोकनास्मितेनतासांमनोहरणादीर्षाभावःसूचितः। अत एवंविधोहरिःवःपात्विति
भावः॥ ॥इतिश्रीगीतगोविंदेभावप्रबोधिन्यांटीकायांसामोददामोदरोनामप्रथमःस
र्गः॥ ॥राधाविलासाकुलवनितान्तर्मिथ्यावलोकनादासमंतान्मोदेनसहवर्त्तमानोदामोदरो।
यस्मिन्सर्गेसतथादामोदरोख्यातासंचारवर्णितंचोक्तं। अथैवंसखीवचनंश्रुत्वास्वय
मपितत्कृत्यंचदृष्ट्वाश्रीकृष्णस्यसाधारणीभूतप्रणयंविलोक्येर्षोदयात्तद्दर्शनमसहमा।
नायाकृत्यमाह॥ ॥द्वितीयेतुहरिंदृष्ट्वासर्गेसाधारणीभुच। प्रणयंगलितोत्कर्षादीर्षी
याचसखींप्रति। उत्कमुत्कंमयायच्चप्रार्थितंहरिणासह॥ रमणंचहरेअत्यपचितीय
नष्टंदीर्यते॥१॥ तदेवाह॥ ॥विहरतीति॥ ॥विहरतिवनेराधासाधारणप्रणयेह

रौ॥विगलितनिजोत्कर्षादीर्ष्यावशेनगतान्यतः॥क्वचिदपिलताकुंजेगुंजन्मधुव्रतमंड
लीमुखरशिखरेलीनादीनाप्युवाचरहःसखी॥२॥अमंदकंदर्पज्वरजनितचिंताकुल
तयात्मविस्मृतात्मकथनसामर्थ्याभावात्।पूर्वमिदानीं/दिवादिरक्षाकरणत्वात्मस्फू
र्त्तिसखीत्वभावाद्विस्मृतित्वादीर्षोत्पत्तिवचनकथनमपिसामर्थ्यंजातंतस्माद्राधासखींप्रतिर
हउवाच॥ ॥कथंभूताहरौवनेविहरति।सतिविगलितनिजोत्कर्षात्ईर्षावशेनक्वचि
दपिलताकुंजेगत्वा।लीनादीनापिरहःसखीमुवाच।कथंभूतेहरौसाधारणप्रणये॥
अस्यायमर्थः।स्वयंराधातोसचिद्रूपाराधाचासाधारणीप्रमुग्धवल्लभप्रणया।स्ने
हातिशयोयस्मिन्नेवंविधेडःस्वहर्त्तारिचहरौवनेविहरतिस्वयंवनेस्थितानदिहारंह
क्षाविशेषेणगलितः।निजोत्कर्षोयस्यास्तस्मात्।प्रथमतःस्वस्मिन्नुत्कर्षस्थितः।मात्स
स्मान्यत्रहरिनिगच्छति।यथा।असाधारणप्रणयेहरौसाधारणाश्रीराधायांप्रण

योयस्यतस्मिन्एवंविधेहरौतांत्यक्त्वावनेविहरतिसतिअर्थात्व्रजवधूभिःसहतस्मा
त्विगलितनिजोत्कर्षत्वादोषविशेनअन्यतः।अन्यत्रगतातस्यप्रत्ययः।सावविभक्तिला
ता।नतत्रअन्यत्रगमनंसाविहारंनशृणुयान्नपश्येत्।एवंविधादीनासतीक्वचिदपिहरेरङ्गा
तेलताकुंजेलतानिरावृतकुंजे।अन्वेषणार्थमागतोपिहरिःनपश्येत्।एवंविधेकुंजेली
नासतीरहोगोप्येसखीसमानशीलव्यसनांप्रत्युवाचेत्यर्थः।।कीदृशेकुंजेगुंजन्मधुव्रत
मंडलीमुखरशिखरे।।शब्दायमानानांमधुव्रतानांमंडलीभिर्मुखराणिशब्दयुक्तानिशि
खराणिअग्रभागानियस्मिंस्तस्मिन्।तत्रागत्यबहिःस्थितोपिहरिस्तच्छ्रुत्वातत्कृतवार्त्तांनशृ
यादेवंविधेकुंजेगताहामादीनासत्युवाचेतिभावः।किमुवाचेत्यपेक्षायामाह।। ।।संचर
दधरेति।।गुर्जरीरागेणगीयतेयतिताले।। ।।संचरदधरसुधामधुरध्वनिमुखरितमो
हनवंशंचलितदृगंचलचंचलमौलिकपोलविलोलवतंसं।रासेहरिमिहविहितविला।

सं। स्मरति मनो मम कृतपरिहासं॥ २॥ गीतस्यास्य गुर्ज्जरी रागः यतितालः॥ ॥ पूर्वंकृतदेवस्कृपया किंचित्स्मृतिरस्या जाता ततो वचनसामर्थ्यजातबलात्पूर्वानुभूतस्मरणात्तत्र एवंविधं वासंतिकं रासीद। ह्वास्वानुभूतशारदीयरासं सखीं प्रति समानशीलव्यसनं लापयति। हे सखि इहास्मिन् रासे हे सखि मम मनः शारदीयरासे विहितविलासं हरिं स्मरति। कीदृशं हरिं। संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं॥ पुनः कीदृशं चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं। पुनः कीदृशं। कृतपरिहासं। विलासनिरेषणेनिवा। तत्र पूर्वं सिंचरत्याधरसुधया कृत्वा वंशानिनादः कृतः। तस्मिन् रासे वाद्यप्रसारपरिरंभादिभिरतिपातिं मुक्तं नयनरमणं कृतं। तेन सर्वा आत्मानं [illegible] कमेनिरे। तदा तासां सौभगमदं वीक्ष्य तत्सरामा यद्भगवान् मया सहांतर्भूतस्तदाहमपि सर्वस्त्रीणां मध्ये आत्मानं वरिष्ठं मन्यमाना गोपीः हित्वा गतो प्रियः॥ मां भजते ततोहं हसती केशवमब्रुवं न पारयेहं चलितुं नय मां यत्र ते मनः एवमुक्तः सन्मा

Pandit Shri Gattulalaji Research Centre
Geeta Govinda
Bhava Prabodhini

गीत०गोव०
६२

प्रबोधिनी·

माह ॥ स्कंधमारूह्य तामित्युक्ता तश्चांतर्द्दधे । तेनापि मदुक्तमेव कृतं । तस्य मनः तास्वेव
स्थितत्वात्तत्राहं नीता ॥ एवंविधः कृतः परिहासो येन यस्मिन् वा ॥ एवंविधं हरिं मम मनः स्मर
ति । पुनः संचरदिति । संचरत्याधरसुधया मधुरध्वनिना मुखरितो वादितो मोहनो वंशो येन तं
। सम्यक्चरन्नित्युक्ता नानाप्रकारस्वरमूर्छनादिरागानां गतयस्ताभिरधरसुधानिर्मधु
रो यो ध्वनिः फूत्काररूपस्तेन स्फुरितः । सन्मुखरितमोहनो मोहजनको वंशो यस्य तं· तेन ध्व
नितमुखरितयोरेकार्थत्वान्नात्र पुनरुक्तिः ॥ एवंविधवंशनादेन स्वयमपि रसाविष्टो जा
तस्तत्स्वरूपं वर्णयतीत्यत्राह ॥ चलितदृगंचलेति । तेनाविष्टः सन् चलितेन दृशोरंचल·
प्रांतदेशाकटाक्षेण संवलितो मौलिः शिरोभूषणं बर्हीपीडं तेन च कपोलयोर्विलोलावतं·
सो कर्णभूषणे यस्य तं ॥ मुक्तामणिजटितहाटककर्णपुष्पे कमलादयो वा ॥ स्खलन्
मौलिनिरूपणान्मयूरचंद्रिकायुक्तत्वात्तद्वर्णयतीत्याह ॥ ॥ पुनः चंद्रिकावादिति ॥

६२

चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं॥प्रचुरपुरंदरधनुरनुरंजितमे
दुरमुदिरसुवेषं।रासे०॥५॥ ॥चंद्रकेणार्द्धचंद्राकारेणचारुणामयूरशिखंड।
कमंडलेनमयूरपिछानांमंडलेनवलयितावेष्टिताकेशाःयस्यतं।तदेवोत्प्रेक्षते।प्रचु
रपुरंदरधनुरनुरंजितमेदुरमुदितसुवेषं।प्रचुरसपुरंदरधनुषाइंद्रधनुषानु
रंजितश्चित्रितोमेदुरःअतिस्निग्धोमुदिरोमेघस्तादृक्सुवेशःसुष्टुवेशःशोभनोवेशो
यस्यतं।एवंविधंगोपकदंबनितंबवतीवेष्टितंस्मरलाहं॥ ॥गोपकदंबनितंबवतीति॥
गोपकदंबनितंबवतीमुखचुंबनलंबितलोभं।बंधुजीवमधुराधरपल्लवकलितद
रस्मितशोभं।रासे०॥६॥ ॥पुनःगोपजातीयकदंबनितंबवतीनांसमूहःसुंदरीणांमु
खचुंबनेलंबितोलोभोधृतोयस्यतं।अत्रलोभपदोक्त्याभगवदधरसुधालोभात्मकः।बीनो
त्तरोष्ठोधरपल्लवोमतोइतिश्रीशुकोक्तेःसाता।तयाकिंचबीजोत्पत्तिभवतिसकदापित्सिं

न गच्छेत्तामेवः। अंगं शार्द्धपस्यैकदेशं मन्यते। यतः घोषशासहस्रगोपकदंबनितंबवतीमुख
चुंबनेनात्तश्लाघ्यं वितललोभो नोक्तः। यावत्कालपर्यंतं तत्स्त्रिंजनकं मनसेप्सितं न प्राप्य
ति। तावत्कालं न शैत्यस्वास्यपति। अतो वक्ष्यमाणकिशलयनननिवेशितसापरिरम्भकृताधर
पानमिति निष्टसो न भवतीत्याशयः। यद्वा। गोपयति रक्षयति गोपः। यद्वा। गां पृथ्वीं गवां
वा पाति गोपो हरिस्तद्रूपो यो कदंबवृक्षस्तत्तत्काद्विक्षण एव तस्य किंजल्कवतिरां
गवासा तद्वत्सर्वत्र प्रसरितः। यथा वृक्षश्च मानिवेष्टितो भवति। यथायमपि वनितारूपानि
लतानिर्वक्ष्यमाणा निर्विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रमेवंविधगो
पनितंबिनीनां मुखचुंबनेन लंबितः। लोभस्तत्र लुब्धो जात इत्यर्थः। मयीति विशेषः। तद्
वाह। पुनः बंधुजीवमधुराधरपल्लवमिति। बंधुजीवनामा बंधूकपुष्पविशेषः। मध्याह्ने
विकसति। लोके दुपहरीया प्रसिद्धस्तद्वदारक्तमधुराधरपल्लवो यस्य तं। सर्वोक्तिक

दंबद्धस्य एवंविध एव पल्लवोपीतांबरकिंजल्कस्थानीयां यथासीच्यमानो वृक्षः पल्लवितः सरसश्च भवति तथायमप्यस्मत्स्नेहेन सीच्यमानस्तथा भवतीत्याशयः। अत एवोल्लसितस्मितशोभमिति। उल्लसितेन शोभा यस्य तं। यद्वा। बंधुमित्रं जीवस्येति। बंधुजीवः जीवस्यायं बंधुः यथा बंधुमित्रं मधुरः सुखदः स्तथायमधरपल्लवः। यथा जीवस्य बंधुः शरीरं तं विना न तिष्ठतीति। तथैतस्याः जीवस्यायमधर बंधुरस्ति तस्मात्तं विना न तिष्ठतीति भावः॥ मित्रमपि कदाचित्क्रुद्धः कठिनः कटुर्वा भवति न तथायमिति। किंतु मधुरः सर्वदा कोमलश्च। पल्लवत्वात्। यद्वा मधुराधरपल्लवं। मधुरं आसमंताद्धरतीति मधुरएधरपल्लवो यस्य तं। पल्लवयतीति। पल्लवरसत्पानात्पल्लवीतं करोति। तथा दावाग्न्यातपादिशोषितं वृक्षं जलसेकात्पल्लवितो भवति यथायमपि विरहतापकामाग्निप्रज्वालितां मामतिशोषितां तत्पानसेकात्पल्लवितां करिष्यतीति भावः॥ योयस्य प्रियो भवति स तस्य मनस्येतादृशो भाति।

Geeta Govinda
Bhava Prabodhini

तेनकिंतुसर्वासामप्येतादृशाइत्याशयेनाह॥ ॥विपुलपुलकेति॥ ॥विपुलपुलकभुज
पल्लववलयितवल्लवयुवतिसहस्रं। करचरणोरसिमणिगणभूषणकिरणविभिन्नतमि
स्रं॥रासे॥४॥पुनःविपुलपुलकयुक्तैर्भुजपल्लवैर्वलयितंवेष्टितंवल्लवयुवतीनांसहस्रम
संख्यंयस्मिंस्तं।परमस्नेहातिशयेनसात्विकाविर्भावाद्विस्तीर्णैःपुलकयुक्तैर्भुजपल्लवै
युक्ताभ्यांभुजपल्लवाभ्यांवलयितंवल्लवयुवतीनांसहस्रंयेनतं।नन्वेकेनभगवताद्वाभ्यांह
स्ताभ्यांसहस्रयुवतीनांवेष्टनंकथंस्यादित्याशयेनाह।॥अमिश्रणेतस्यचतुधलयांतस्यस्त्रि
लिंगत्वादीशत्वेनमिश्रीभूतानांभगवंतमात्मानंयावतीर्व्रजयोषितःतासांमध्येद्वयोर्द्व
योः॥अंगनामंतरेणमाधवइतिवाक्याभिप्रायेणमिश्रीभूतानांतासांवलयितमित्यर्थः॥एवं।
कदंबवृक्षत्वेनोक्तत्वाद्भुजयोःपल्लवत्वंयथा।विपुलपुलकभुजपल्लवयुक्तानिर्दुवती
रूपानिलीतानिर्वलयितमितिभावः॥नन्वेवंविधेरासेरात्र्यामंधकारेतद्दर्शनसुखं।नन्न

वतीत्पाशयेनाह॥ पुनः कीदृशं। करचरणोरसिमणीति। एवंविधस्युवतीजनानांभगवतश्चकरस्चरणोरसिस्थितैर्नानामणीगणजटितैश्चंद्रकिरणैश्चलमुद्रिकादीनिमणिजटितानि। निचरणेनूपुराणिकिंकिणीश्चंमुद्राभरणादीनि। उरसीपदकंचहृःकौस्तुभंएकलीकाकंनकमणिमुक्ताहारादीनिकरोरसिचरणेक्रमंविहायकरचरणोरसीति। पुनःकंमोक्रूपानुजप। ह्लववलयितत्वादालिंगनेनांतरायकरणात्स्पष्टैस्थापितानिअतःक्रमोनात्ररक्षितः। पुनः ॥जलदपटलेति॥ ॥जलदपटलचलदिंदुविनिंदकचंदनतिलकललाटं। पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं। रासे०॥ जलदपटलेनघनसमूहेनचलद्वेष्टितोयइंदुस्तस्यपरिवेषेणविनिंदकचंदनतिलकंललाटेयस्यतं। जलदस्थानेश्रीमल्ललाटंइंदुस्थानेचंदनतिलकं। घनादिपदंत्यक्त्वाजलदपदोक्त्या। जलदवृष्टिदानकर्त्तामेघस्तद्वत्सदृष्टिदानकर्तेतिभावश्चोक्तः। पुनःपीनपयोधरेति॥ ॥पीनातिकठिनपयोधरयोःपरिस।

स्पर्य्यंतनागमर्द्दनेननिर्द्दयंहृदयकपाटंयस्यतं।कपाटोक्त्यायथाकपाटोदृढतरस्तदंतःस्थि
तंवस्तुदुर्ल्लभमशक्यंतथाभगवत्तद्धृदयांतःस्थंदुर्ल्लभमशक्यमितिभावः॥निर्द्दयहृदयोक्त्या।
नवनीतवत्कोमलयोःपयोधरयोःपीनत्वादंतकठिनत्वाद्गाढालिंगने।पयोधरयोर्व्यथामाभूदि
तिनविचारयतीतिनिर्द्दयहृदयत्वं।तथालिंगनंकरोतियथापयोधरपर्य्यंतंमर्द्दनंभवति
।अतःकरमर्द्दनंत्यक्त्वापरिसरमर्द्दननिर्द्दयहृदयकपाटइत्युक्तं।एवमालिंगनसमयेस्वच
क्षुस्थापितगंडस्मरणात्तदाह॥ ॥मणिमयेत्यादि॥ ॥मणिमयमकरमनोहरकुंडलमंडित
गंडमुदारं।पीतवसनमनुगतमुनिमनुजसुरासुरपरिवारं।रासेहरिं॥ध्रु॥पुनः
प्रचुरमणियुक्तेमकराकारेमनोहरेकुंडलेताभ्यांमंडितौगंडौ।कीदृशौगंडौ।हरिंवाउ
दारं।यउदारोभवति।सदानेपात्रापात्रंविचारयति।तथायमपि।कामिनीभिर्मिलिता
चुंबनदृष्टत्वात्तथेति।मकरोक्त्यायथामकरःसरसप्रदेशेतिष्ठतितथागंडस्यसरसत्वा

कुंभजलयोर्मकरलान्मंडितमुक्तं।कामस्यकेतुलांमनोहरत्वंच।पुनःपीतवसनं।पीतेवसनेय
स्यतं।पुनःअनुगतमुनिमनुजसुरासुरवरपरिवारं।एवंविधांनिरावरणलीलांदर्शनार्थमा
गतानांमुन्यादीनांदर्शनमाभूदितिहेतोःपीतवसनधारणं।अतएवप्रांतेवर्णनंकृतं।।पी
तांबरधारणादनुगतःप्राप्तः।मुनिनारदादयः।मनुजोद्धवादयः।सुरःशंकरादयः।असु
रःप्रह्लादादयः।वरःश्रेष्ठः।परिवारोयस्यतं।एवंविधाभक्ताअपिपरिवाररूपा।स्वजनास्ते
षांदर्शनाभावः।।निरावरणलीलायामुक्तस्तदान्येषांकृतः।यद्वा।मायाजवनिकाच्छादन
रूपंपीतवसनं।यस्याआगताअपिमुन्यादयस्तांलीलांनपश्येयुः।यद्वा।भगवंतंश्रीमंतंकु
लायथाशंखचूडःआगत्योपद्रवंकृतवांस्तथाकेप्यन्येसमागत्यमाकुर्युरितिमायायेनज
वनिकारूपपीतवसनादत्तुपश्चादाहत्यमुन्यादयोवरपरिवाररत्नान्नपश्यः।श्रेष्ठावेत्रधर
इवरक्षार्थंतिष्ठंति।यथामहाराजासपरिच्छदउद्यानविहारार्थंगतःसन्वस्त्रजवनि

कापीतवसनादरूपश्चादावरणंकरोतीति।तत्रतदीयानामनुवर्तिनांकस्यचित्सितंकस्यचि-
द्धरितंकस्यचित्पिंजरीकरोति।तान्यावरणानिभिन्नवंति।नृपतेश्चारक्तानिराजचिन्हज्ञापकानिवि-
तानादीनिआरोप्यंते।तत्ररितोरक्षार्थंतदीयामुख्याअधिकारिणोयष्टिधरास्तिष्टंति।यथा
निकटेकोपिनागच्छेत्तथात्रमहाराजाधिराजईश्वरेश्वरस्यभगवतःपीतकौशेयान्यावरणा-
नि।तथासर्वेषामधिकारिणांमुख्यामुन्यादयोवेत्रधरास्तिष्टंति।यथारात्रिचराश्चासुरादयो
नायांतीत्याशयः।यद्वा।पीतवसनंप्रतिअनुगतंविचित्रितंमुनिमनुजसुरासुरखरपरिवारो
यस्मिंस्तं।पीतांबरविशेषणंवा।एवंसर्वाभिःसहरासविलासंस्वकीयमुक्त्वापृथक्त्वेनैक
तेनैकदास्वस्मिन्प्रकारांतरेणविशदकदंबतलेकृतंरमणंस्मरन्नाह॥ ॥विशदकदंबत
लइति॥ ॥विशदकदंबतलेमिलितंकलिकलुषभयंशमयंतं॥मामपिकिमपितरलतरं
गदृशामनसारमयंतं॥रासे०॥७॥हेसखिएवमेकस्मिन्समयेप्रेमकलिर्मेमहरिणास।

हृज्जातस्तेनकलिनामनसिकलुषंभयंजातं।अहोमयाभगवतासहकलिःकृताः।अयमी
श्वरःसर्वेरसभोक्तातेनसहमयाकलिःकृतस्तेनकलुषंभविष्यति।तद्भयान्मयासर्वंत्य
क्त्वाविरादविस्मृतपत्रपुष्पयुक्तेकदंबेएकांतेज्ञात्वायथाकोपिनजानीयात्तथातत्रैवाहं
स्थिता।तथाभगवताज्ञातं।साकलिनाकुत्रगताभविष्यतिहुंचहदुक्तातिसुकुरीस्त्रीतथा
ज्ञात्वामत्पदान्वेषणेनयत्राहंस्थितातत्रागत्यमिलितःसम्यगनुनयादिकृत्वाप्रसाद्यसरखो
पिनासन्नेकांतेज्ञात्वामामपिमांप्रतिकिमपिविभ्रमरहस्यानानासनबंधविशेषरूपायेत
रंगामनसिवर्त्तमानास्तैरनंगकामाभिलापयुक्त्या।दृशाकामार्त्तिसूचकयादृष्ट्यामनसा
पूर्वकिंसर्वात्मनामयामानिष्टःसन्नरमयंतमित्यर्थः॥एवंविधंरमणंकृत्वाकलिकलुष·
भयंत्वामयेतामितिभावः।एवंविधंहरिंमममनःस्मरति॥हरिस्तुमुग्धवधूनिकरेविलस
तीदानींमयाकिंकर्त्तव्यंतत्कांतेव्यतामाह॥ ॥श्रीजयदेवभणितमतिसुंदरेति॥ ॥श्रीज

यंदेवभणितमतिसुंदरमोहनमधुरिपुरूपं। हरिश्चिरणस्मरणं प्रतिसंप्रति पुणएवतां
मनुरूपं। रासे०।जद्देसतिरिंसं प्रतिदानीं सकलदुःखहर्त्ता हरिश्चिरणस्मरणं प्रतिमनोनि
वेशनीयमितिभप्पापायोसौ। तत्र स्मरणं पुणएवतां प्रतिसुंदरमोहनमधुरिपुरूपं।
वद्धमानसौहृदस्यरूपं। अनुरूपंभविष्यति। नत्वन्येषामितिभावः। एवंविधं राधावाक्यं स
खीप्रतिगक्तं श्रीजयदेवेन स्वगीते कृतप्रबंधेभणितमित्यर्थः॥ ननु हरिस्तां विहाय यान्या
भिः सह विलसति तर्हि त्वं किमितितं स्मरसीति चेत्तत्राह॥ ॥गणयतीति॥ ॥गणयति
गुणग्रामंभ्रामंभ्रमादपिनेहते। वहतिच परितोषंदोषंविमुंचति दूरतः। युवतिषुच
लत्तृष्णेकृष्णेविहारिणिमांविनापुनरपिमनःकामंवामंकरोतिकरोमिकिं। हेसखि
मममनः नकेवलंरासेविहितविलासंहरिंस्मरति किंतुमांविनायुवतिषुविहारिणिकृष्णे
सच्चिदानंदरूपेमनोवामंविदग्धंचतुरंउत्तमाभिलषी। यद्वा वामास्त्री तत्संबंधीपरस्विहा

रं हर्षोत्पादकं भवति। अत एवैषां वंशे न गतान्यत एवंविधापि पूर्वोक्तरुत्कस्फुरन्मनोहा
रिविलासलालसं। एवंविधं कृष्णं। कीदृशे। युवतीषु वलत्तृष्णे। तदन्वेषणार्थं युवतिषु वल
तित्तृष्णाभिलाषुकस्य तस्मिन्। पुनरपि पूर्वं मदैकनिष्ठं हालाकामनालग्नाधुनैवंविधेपि।
करोति किं करोति। निजोत्कर्षोनुभावानंदोन्मदं मम वशं न भवतीति भावः॥ एतावन्न किंतु
गणयति गुणग्रामं। तस्यैव गुणानां ग्रामं समूहं ऐश्वर्यादि गणयति। गणनां करोति। ग्रा
मे समूहे वसति इदं देशाद्यादि पूर्वक इति ऐश्वर्यादिरूपे। अयमीश्वरः। नानाखंभितादिरस
ज्ञो रूकावीर्यवान्। कर्तुमकर्तुमन्यथाकरणसमर्थः॥ यत्रास्तीचयः कश्चित्परदारान्निमत्र
को भवति तस्यापयशः स्यादस्य यशः मुक्ता मुमुक्षवश्च गायंति श्रीपरमहंसोभालक्ष्मीयु
क्तश्च ज्ञानवान्। तन्नविष्यक्रीभानरसतात्रीम्यज्ञश्च मय्यनुवृत्तो वा रसत्तात्रीम्यज्ञाना
र्थमन्यत्र रमति तत्र विशेषमनजन्यमानस्ततो विरक्तो भवत्येतेन केशुचतहैरागणे। एवंविधं

गुणग्रामंगणयतिस्त्रामंत्रमादपिनेहते।क्रोधंअज्ञादपिनेहते।कदाचिन्मुखतोनकथ
येद्यदिस्तत्तज्ज्ञापकचेष्टांकार्यंतामपिनेहते।वहतिचपरंतोषंचपरंपरितःसर्वतःबाह्याभ्यं
तरतःसंतोषंवहति।दोषंविमुंचति।इतरतःसाधारणीत्वविलसनरूपंदोषंइतरतःविशेषेण
मुंचति।तस्मात्खंडिताभिधामयातदभिजिघिपितमुक्तंभिन्नमेवकर्तव्यमित्यर्थः॥गीतेष
ष्टसखीप्राहराधामुत्कंठितावचः॥स्मृत्वातद्रमणंपूर्ववृत्तंयत्तदिहोच्यते।गीतस्यास्य
मालवगौडरागः॥एकतालीतालः॥ ॥ह्येतमेकमेवेयत्रसैकतालीतिसंज्ञितेति॥उत्कं
ठितावाक्यमाह॥ ॥निभृतेत्यादि॥ ॥निभृतनिकुंजगृहंगतया।निशिरहसिनिलीय
वसंतं॥चकितविलोकितसकलदिशारतिरभसरसेनहसंतं॥सखिहेकेशिमथनमु
दारं॥रमयमयासहमदनमनोरथभावितयासविकारं॥सखिहे॥१॥ ॥उत्कंठिताद्वि
विधा।प्रथमसमागमोत्कंठायुक्ता।परासंयोगानुभवपूर्वकत्वात्तस्याविरहपूर्वानुभूतंस्म

त्वात्तथोक्तंवाऊर्याति। अतएवप्रथमसमागमलज्जितयेति। पूर्वमननुभूतत्वात्तथोक्तिरिति॰
भावः। हेसखिसमानशीलत्वाद्रहस्यमपिवदति। त्वंमयासहकेशिमथनंरमय।। सर्वोऽपिनामा
त्यक्त्वाकेशिमथस्याभिप्रायमाह।। केशिदैत्यमहाबलिष्ठोहयाकृतिःस्त्रीविकाररहितःसर्वपुरु
षाःपश्चाद्वस्त्रीचिह्नास्तनयुक्ताभवंति। हयस्यतदाकृत्याभावात्परमपुरुषार्थयुक्ताःसमर्थाः।
श्वभवेदतस्तदाहृतेःकेशिनःमुखविवरेहस्तंप्रक्षिप्यमध्येतिआज्ञोरुयतीतितथाभिप्राये
णतथानामग्रहणं। एवंविधंधीरोद्धतं।। मात्सर्यवानहंकारीमायावीरोषणश्चलः।। विकथन
श्चविद्वद्भिर्धीरोद्धतउदाहृतः।। एवंविधंमयासहरमय। विहारंकारय। नन्वेवमुल्ल
हत्वयासमर्थायांकथंरस्यतीत्यत्राह।। कीदृशंउदारं। यउदारोभवेत्सपात्रापात्रंनविचारय
तियोऽस्ययाचतेतंतथादद्यादित्याशयः। तथापित्वंकथंतेनसहरंस्यसेइतितत्राह।। कीदृ
शयामया। मदनमनोरथभावितया। मदंनयतिप्रापयतीतिमदनस्तस्यमनोरथाः। नानो

गीत०भाव०
६९

ऊढभावपूर्विकास्तैर्भावितयातेषुभावनायस्यास्तथाविधयाननन्वेवंविधायामपिलल्लयितस्य
भावोनभविष्यतितत्कथंसिद्धिस्यात्तत्राहाकीदृशंसविकारं।विकारोमानसोभावस्तेनसहव
र्तमानं।तस्यमानसोभावोमध्येनास्ति।स्फुरन्मनोहारिविलासलालसालादितिभावः॥एते
नाभावोन्यानुरागीनिरूपितः।नोचेद्रसाभासः स्यात्।उक्तंहि॥अनुरागेणोद्धुरक्तायांरसाव
हश्चारितः।अभावेत्वनुरागरसाभासंजगुर्बुधाः॥एवमनुरक्तैवयात्पात्र्यैक्तिवतीयतः॥
मदनमनोरथभाविनतावात्।यथाकामार्त्तीविषयनिरूपणश्चेतनाचेतनेष्विति॥एवंवि
धपरस्परानुरागपूर्वकंपूर्वोक्तनन्दरमणंराधामाधवयोर्निकुंजगृहेतत्स्मरसादृ।पु
नः कीदृश्या।निभृतनिकुंजगृहगतया।माधवलक्ष्मीपतिस्तेनसहरमणेयद्यदपेक्ष्यै।
तेवस्तुनानाविधगंधवस्त्रालंकारमन्दभोज्यतांबूलशय्यासनरागभोगादयस्तैर्भृतंसम्भृतंस्फुरि
तं।निकुंजरूपंगृहंतस्मिन्गतया।रात्रौतत्रभगवंतंस्थितंज्ञात्वाहंतत्रागता।कीदृशंनिविरि

प्रबोधिनी०
६९

Pandit Shri Gattulalaji Research Centre
Geeta Govinda
Vallabhacharya Bhav Prabodhini

हसितिनिर्जीयवसंतंसा।तदामदागमनंज्ञात्वाममार्त्तिविकल्प्याममममार्त्तिवैकल्यादिविलोकि।
नार्थीनिशिरहसिएकांते[illegible]कुंजकोणेनिलीयसंकुचितात्मानंकृत्वावसंतंतिष्ठंतं।पुनः
चकितविलोकितसकलदिशा।तत्राहइणमानंमत्वाचकितंयथास्या[illegible]तथाहरिःकुंत्रास्त
इतिविलोकिताःसकलादिशोयया।तदाकीदृशंरतिरभसभरेणहसंतं।रत्यातिशयो
च्छलितरसेनमद्वैकल्यादिकंवीक्ष्यहसंतं।पुनःकीदृशं॥प्रथमसमागमेति॥ ॥प्रथम
समागमलज्जितयापटुचाटुशतैरनुकूलं।मृदुमधुरस्मितभाषितयाशिथिलीकृतजघनदु
कूलं।सखिहे०४॥ ॥प्रथमसमागमलज्जितया।प्रथमसमागमाल्लज्जायस्यास्तथा।प्रा
गल्भ्याभावात्प्रथमसमागमात्तत्परिहासकृताज्ज्ञानाल्लज्जितया।प्रथमसमागमाल्लज्जा।
यस्यास्तया।प्रागल्भ्याभावात्प्रथमसमागमात्तत्परिहासकृताज्ज्ञानाल्लज्जिता।यद्वा
।प्रत्यहंनूतनतरत्वात्प्रथमसमागमोक्तिरित्यर्थः।कीदृशं।पटुचाटुशतैरनुकूलं

पटुममप्रसादनसमर्थानां चाटूनां रीतिप्रियोक्तिस्यादिति हारावलीपटुनाराधीकृतवादक
।विनयोक्तीनांशतैर्मंत्रैरनुनयंतांअत्र अनुनयं कृतवंतं।पुनः कीदृश्या।मृडुमधुरस्मितभाषि
तया।मृडुमधुरस्मितभाषितया।मृडुमधुरस्मितेनउपलक्षितंभाषितंयस्यास्तया।एवंविध
मनुनयंतंप्रियंज्ञात्वावक्रोक्तिकाठिन्यादिरहितत्वान्मृडुःश्रवणसुखदत्वान्मधुरं
ईषद्धासयुक्तंप्रथमंमदागमनंविज्ञायनिश्चीयस्थितामपिकेवलंहठाद्दसितः।अत्रअनु
नानुनयति।तस्मात्स्मितंतदपस्केनन्नादृतं।वृथाकिंकथयचेति।कीदृशं।शिथिलीकृ
तजघनेडुकूलं।शिथिलीकृतंजघनेस्वडुकूलंवसनंयेनतं।स्वचारुक्तिभिः।मनु
तस्मितादिभिरपरातलज्ञावामताविज्ञायानुकूलांदृष्ट्वाशिथिलीकृतंअशिथि
लंशिथिलीक्रीयते।तद्वैदग्ध्यविलोकनार्थंप्रथमसमागमत्वाद्वेगादीकृतपरिध
त्तंतच्छिथिलीकृतं।डुःखेनानुकूल्यकरणाज्जघनेस्थितत्वाद्वसनस्यडुकूलत्वप्रयोगइ

घे॰

तिभावः॥ ततोयत्कृतंतदाहकीदृशा॥ ॥किशलयशयननिवेशितया।चिरमुरसिममैव म×
शयानं।कृतपरिरंभणचुंबनयापरिरभ्यकृताधरपानं।सखि०॥३॥किशलयशयननिवेशित
या।किशलयानिकोमलपल्लवकृतशय्यां।निवेशितातया।एवंविधाशय्या॥पूर्वं रचिता।स्थितात
त्रप्रार्थनापूर्वकंनिवेशिता॥शायिता।कीदृशं।तदनंतरंचिरमुरसिममैवशयानं।चिरंचिर
कालहृदयेमदप्राप्त्याशरीरेतापस्थितत्वात्यावत्तापनिवृत्तिर्भवेत्तावच्चिरंममैवोरसि
एवकारेणनान्यस्याः।अन्यस्याउरसिसुखोभवतीतिचेत्तापोनतिष्ठेदतोममैवोरसिशयान
मितिभावः।कीदृशा।कृतपरिरंभणचुंबनया।कृतेपरिरंभणचुंबनेययातया।अत्रत्यात्तिंछु
क्तंप्रियंविलोक्यपरिरंभणचुंबनंचमयाकृतं॥कृतपरिरंभणचुंबनइत्यत्रकालावच्छेद।
कोक्त्याउरसिशयानस्यबाहुभ्यामालिंग्यचुंबितइत्याशयः॥कीदृशं।परिरभ्यकृताधर
पानं।तथातेनापिपरिरभ्यकृतं।अधरपानंयेनतं।मदालिंगनचुंबनानुरक्तांङ्गालातेन।

पिमांपरिरभ्याधरपानंकृतं।एवंपरस्परानुरागोरसावहः।कीदृश्या॥ ॥अलसनिमीलि
तलोचनया।पुलकावलिललितकपोलं।श्रमजलसिक्तकलेवरया।वरमदनमदादतिलोलं
सखिहे॥५॥अलसनिमीलितलोचनया।अलसेनिमिलितेलोचनेयस्यास्तया।तत्रअधरपा
नान्ममाधिसुखातिशयादतिशैथिल्यान्निमीलितलोचनजातेत्यर्थः।कीदृशं।पुलकाव
लिललितकपोलं।मदधरपानात्प्रियस्यापिसात्विकाविर्भावात्पुलकानामावलीभिर्ललि
तेतिसुंदरेकपोलेयस्यतं।पुनःकीदृश्या।श्रमजलसिक्तकलेवरया।श्रमजलैःसिक्तं
कलेवरंशरीरंयस्यास्तया।नानासनबंधविशेषाच्छ्रमजलैस्तथा॥अत्रशरीरादिपदंत्य
क्त्वाकलेवरोक्तिरितिज्ञापितंशीर्यमावलादत्रशरीरपदप्रयोगोनोचितः।कलानुषो
डशोनागाःकलेद्वितीयाद्विवचनत्वात्तस्याश्चतुर्गुणाःषष्टिनागास्तेनचतुःषष्टिकला
स्तयाशयेनकलेवरेतिवरणंकरोतियस्यासाकलेवरातया।यद्वाकलेप्रथमाद्विव

चेतेनषोडशाभोगाद्वियुगणद्वात्रिंशगुणस्तत्तुद्वात्रिंशछंदरूपणात्मकः।कलारूपःतेनकले
द्वात्रिंशछंदरूपणरूपाकलाएवंविधेकलेवरेतीतिकलेवरात्तयेतिभावोवासूचितः।श्र
मजलसकलकलेवरयेतिपाठेश्रमजलंसकलंकलेवरंयस्याःतन्निमित्तमाह।।कीदृ
शंवरमदनमदादतिलोलं।वरःश्रेष्ठःसुंदरोवाएवंविधोयोमदनस्तस्यमदादतिलो
लंचपलं।तन्मदातिशयप्रयुक्तेनसद्भक्तीडनेश्रमसिक्तकलेवरत्वंयुक्तमेवाशयः।यद्वा
विवाहार्थंसिद्धोनवतिसवरउच्यते।तस्यपूर्वंविषयभोगाभावान्मदनमदस्तिष्ठति।तन्म
दादतिलोलःसकृष्णः।यद्वाश्रमनस्तापूर्ववस्तुप्राप्तिर्भोगेकाममदेनात्रपिजननाल्लोल
इतिभावःसूचितः।तत्सामयिककामानुभूतभावविशेषस्मृत्साह।। ।।कीदृशपा।। ।।कोकि
लकलरवकूजिततयाजितमनसिजतंत्रविचारं।श्लथकुसुमाकुलकुंतलयानखलि
खितघनस्तनभारं।।सखिहे०।।५।।कोकिलकलरवकूजितया।कोकिलस्यकलरववत्कूजि

तं यस्याः वरमदनमदादतिलोलं ॥ नायकशिरोमणिं । आप्परसाविष्टासत्तिरतिसामयिककोकिलस्य कलअव्यक्तमधुरशब्दवत्कूजितं यस्याः । वरमदनमदादतिलोलं । नायकशिरोमणिं । आप्परसाविष्टासतिरतिसामयिककोकिलस्य कलअव्यक्तमधुरशब्दवत्कूजितं यस्याः ॥ कोकिलेति पुल्लिंगनिर्देशाद्वक्ष्यमाणमारीके रतिकेलिसंकुलरणारंभे तया साहसप्रायेकांतजयाय किंचिदुपरि प्रारंभि यत्संभ्रमादित्युक्तेः ॥ पुंधर्मप्राबल्यात्कोकिलेति पुल्लिंगोक्तिरिति भावः ॥ कीदृशं ॥ जितमनसिजतंत्रविचारं । जितमनसिजतंत्रस्य कामशास्त्रस्य विचारो येन तं तच्छास्त्रोक्तनानासनबंधभेदपूर्वापरक्रियातिकरणाज्जितो न्यूनतच्छास्त्रविचारो येन । तंत्रं प्रधानशास्त्रयोरिति विश्वः । ननु मनसिजः मनस्युत्पन्नस्य तच्छास्त्रविचारजयकरणं नोचितमिति अत्रायमाशयः । मनसिजो मदनः । मदं नयति प्रापयतीति मदनस्तस्य मदादतिलोलत्वात्कामार्तो हि विचाराविचारशून्यत्वात् तच्छास्त्रविचारस्य तथात्व

Geeta Govinda vallabhacharya-agrahara.org Bhava Prabodhini

तिरीत्याशयः॥ तज्जयकृतस्य लक्षणमाह॥ कीदृश्या। अथ कुसुमायुधजयांकितया। अथ कु
सुमैरायुधाः अंकिताः यस्यास्तया। तत्तत्रविचारजयकरणान्मनसिजजया। कृतत्वात्तस्या।
स्तत्कुसुमैस्तच्छायारूपैस्तच्छुसनाच्छद्ममाणघनचयरुचिरे रचयति चिकुरे तरलिततरुणा
नने ऽलकालोलत्वात्तत्काननरूपकुंतलानामाकुलत्वमुक्तं। किंच कीदृशे। नखलिखितस्तनभा
रे॥ नखैर्लिखितः॥ अंकितः घनस्तनभारो येन तं॥ वक्ष्यमाणमनोभवमंगलकलशसहोद
रत्वं पयोधरयोरुक्तत्वादेवंविधघनस्तनभारे नखेनालिखितः। तेन तज्जयसूचकस्तनमंग
लकलशसहोदरे नखांकरूपो लेखो लिखितः॥ तज्जयज्ञापकरूपां मुद्रां कृत्वा स्थापित
इत्यर्थः॥ मनोधिष्ठानहृदयत्वात्॥ हृदयस्थयोः स्तनयोर्मनसिजस्य प्रातिवेश्मकत्वात्। घ
नस्तनभारस्यापि नखलेखकृतः यथा कस्यापि विजाड्यः प्रजासंबंधी केनापि स्थिते तत्प्रातिवे
श्मिकानामपि गृहे राजमुद्रां क्रियते तथात्रापि तत्कृतमित्यर्थः। स्तनकाठिन्यत्वाज्जागरूकः

Geeta Govinda
By Prabodhini

गीत० भाव० ५२

यद्वा॥ तंत्रप्रधानशास्त्रयोरुक्तत्वात्सर्वंमनसिजतंत्रशास्त्रविचारजयः प्रोक्तस्तथा मनसि।
जस्यप्रधानमुख्यस्यापिजयस्तउक्त्याप्रोच्यते। कुसुमेषुत्वान्मानसिजकुसुमेषुतेषामु
त्पत्तिस्थानंकाननंरतिपतिमृगकाननेप्रोक्तत्वात्तत्रापिप्राधान्यं। एवंविधयोःसुरतसंग्रा।
मेस्तनथकुसुमाकलनकुंतलनयोरित्युक्त्यानस्यप्रधानस्यापिजयश्चोक्तः। तद्द्वयस्तबकंनख
लिखितघनस्तनभारः प्रोक्तत्वान्मनसिजस्यसुरतसंग्रामेद्विविधोजयश्चोक्तः। [illegible] इति
भावःसूचितः। ननुसुरतसंग्रामेसमसुखदुःखकर्त्रोर्दरिद्रः। श्रूरेणनविपत्तियतोमनसिज
तंत्रप्रधानशास्त्रयोर्जयः कृतः। इत्यपेक्षायामाह। कीदृग्रूपा। चरणरणितमणिनूपुरयापरि
पूरितसुरतवितानं। मुखरविशृंखलमेखलयासकचग्रहचुंबनदानं। सखिहे ॥६॥
चरणरणितमणिनूपुरया॥ चरणयोरणितौमणिनूपुरौयस्यास्तथा॥ यथासंख्यमादि
निवर्त्तिका॥ मुखरः वाहनानांचरणेसुश्रृंखलादयः श्रावध्यति। यथापुष्पलायनंनन्नजे

प्रबोधिनी० ५२

थु।रत्तेतुबुरुः संतः मदयुक्ता गजादयस्तस्ततत्र स्रवंति तदा रणिता मुखरिताः शृंखला
भवंति।तथा मयापि चरणरणितमणिजटितनूपुराभ्यामत्यायसंपत्तियुक्तया संयामः
कृतः।तेनाकातरत्वं वादरिज्ञानात्वत्वं शूरत्वं चोक्तमिति भावः॥कीदृशं परिस्फुरितसुरत
वितानं।परिस्फुरितः सुरतवितानो येनतं।परितः संमतात्स्फुरितः स्फुरणतां नीतः सुरतवि
स्तारो येन।अत्र तात्पर्यमाशयः।यथासंयामादनिवर्तिकानामेवंविधान् युद्धार्थीस्थितान्
शूरान्दृष्ट्वा सन्मुखसंयामाय स्थितः शूरः सोपि रणभूमौ वितानं चंद्रातपत्रमारोपयति
इति तथायं मत्प्रियः चरणरणितमणिनूपुरयुक्तां मां संयामार्थीस्थितां शूरां अनि
वर्तिकां दृष्ट्वा स्वयमपि समंतात्स्फुरितसुरतवितानं यथा स्यात्तथा जात इत्याशयेनोक्त
मिति।अनेनान्योन्या सुरतसंयामे सुभटत्वं सूचितं।ततो यज्जातं तदाह।कीदृश्या।मुख
रविशृंखलमेखलया।मुखरा विशृंखला मेखला यस्याः तया।एवंविधसुरतातिश्रमेण पू

र्वं सुखरता श्लाघ्यमाना जाता। पश्चाद्विश्लिष्टं खलादिगतं त्रुटितं भ्रष्टं खलं बंधनयुगं यस्या
एवंविधा या मेखला कांची यस्याः तथाविधया। कीदृशं। सकचग्रहचुंबनदानं। कचग्रहे
ण सह चुंबनदानं यस्य तत्। यथा संग्रामे पूर्वं शूरा हरतः शस्त्रबाणादिक्षेपणादिना तत उत्री
यनिकटे खड्गयमदंष्ट्रादिभिस्ततः। तान्यपि त्यक्त्वा मुष्टिकेशग्रहणदंतनखक्षतादिभिस्त्रु
टितवर्माः संतः संग्रामं प्रकुर्वंति। तदा महाराजा तानेवंविधान्संग्रामादनिवर्त्तकान्विलो
क्य तान् रंजितः प्रसन्नो भूत्वा स्वकीयान्सर्वान् रत्नवित्तवाजिग्रामादिकं ददाति। तथात्रा
पि पूर्वं कटाक्षनखदंतक्षतादिभिस्त्रुटितनीवीकंचुकीबंधनामेवंविधां मां दृष्ट्वा प्रसन्नो भू
त्वा तत्रोचितं चुंबनदानमकरोदिति भवः। ततो यज्जातं तदाह। कीदृश्या॥ रतिसुखसम
यरसालसया दरमुकुलितनयनसरोजं॥ निःसहनिपतिततनुलतया मधुसूदनमुदि
तमनोजं। सखि हे॥१॥ रतिसुखसमयरसालसया। रतिसुखसमयरसेनालसा तया॥

रतिः सुरतक्रीडा तया यत् सुखं । तस्य समयः कालस्तस्य यो रसो निर्वचनीयोनुभवैकवेद्य
स्तेनालसा व्याप्ता युक्ता तदा ॥ कीदृशं । दरमुकुलितनयनसरोजं । दरईषन्मुकलिते किं
चिद्विकसिते नयनसरोजे यस्य तं । प्रियोपरि रसातिशयोदयाद्दरमुकलितनयनसरोजो
जातः दरमुकलितनयनसरोजो रूपा यथा सूर्योदयो सरोजाणां दरमुकलितनसरो॰
जोजातः दरमुकलितनयनसरोजो रूपा यथा सूर्योदयात्वं तथात्रापि सखुदयन्नयन
सरोजाणां तथोक्तिरिति भावः । कीदृश्या । निःसहनिपतिततनुलतया ॥ निःसहनिपति
ता तनुलता यस्यास्तया ॥ निःसह सहनाक्षमता तेनातिशयेन पतिता रसावेशातिशयाद्व
लनवलनदेहानुसंधानुरहिता जाता । यतस्तनुलता तनुसूक्ष्मा लतारूपा । एवंविधा सति
केशिमथनोदारेण सहक्रीडनात्तथा जायत इत्याशयः । यद्वा । तत्र विचारे । विस्तृतापि ल
ताकोमलपल्लवकुसुमसौगंधाढ्या सर्वेषांआनंदजनका रसिकानिलस्पंदोलनात् धर्मा ।

धिक्याद्वालतानासतिपतति।तथेयमपि।ननुजनतासर्वावयवैःसर्वांगसुखदारतिकेलिकला
संपन्नामदनमनोरथभावितापिकेशिमथनोदारेणसहक्रीडनेरतिसुखसमयारसालसता
ता।तथाजातइत्यर्थः।।ग्रथेववर्द्धमाणत्वात्।निःस्पंदाजघनस्थलीशिथिलतादोर्वल्लिरुत्कंपि
तं।वक्षोमीलितमक्षिपौरसरसःस्त्रीणांकुतःसिध्यति।कीदृशं।मधुसूदनंउदितमनोजं
च।मधुसूदनंमधुदैत्यसूदनकर्त्तारंअतिबलिष्ठं।उदितमनोजं।उदितःमनोजंयस्यतं।म
एवंविधेनसहक्रीडनेतथाजायते।यद्वा।मधुसूदनं।मधुसुउदिकानान्वेषणपरं।।अ
नेनभृंगवृंदस्यकुसुमावलीनांमधुपास्वादयन्कमलान्यामुकुलप्रमधान्वन्वयतस्यामल
सक्तोभवति।तथायमपिअनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसास
कोजातः।सएवात्रैवोदितोमनोजः।कामाभिलाषोवायस्यतं। नान्ववीतेरूपितं।य
द्वा।मधुसूदनमुदितमनोजमित्येकपदं।मधुसूदनस्परसान्वेषणपरस्यमुदितोमनो

Geeta Govinda
Vallabhacharya
Bhava Prabodhini